


॥ श्रीरामाय नमः ॥

# श्रीराम शतनाम स्तोत्र

वामे भूमिसुता पुरस्तु हनुमान् पृष्ठे सुमित्रासुतः(श्),
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादि कोणेषु च।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्,
मध्ये नीलसरोजकोमलरुचिं(म्) रामं(म्) भजे श्यामलम् ॥

अथ स्तोत्रं

शम्भुरुवाच

राघवं(ङ्) करुणाकरं(म्) भवनाशनं(न्) दुरितापहं,
माधवं(ङ्) खगगामिनं(ञ्) जलरूपिणं(म्) परमेश्वरम्।
पालकं(ञ्) जनतारकं(म्) भवहारकं(म्) रिपुमारकं(न्),
त्वां(म्) भजे जगदीश्वरं(न्) नररूपिणं(म्) रघुनन्दनम्॥1॥

भूधवं(वँ) वनमालिनं(ङ्) घनरूपिणं(न्) धरणीधरं,
श्रीहरिं(न्) त्रिगुणात्मकं(न्) तुलसीधवं(म्) मधुरस्वरम्।
श्रीकरं(म्) शरणप्रदं(म्) मधुमारकं(वँ) व्रजपालकं(न्),
त्वां(म्) भजे जगदीश्वरं(न्) नररूपिणं(म्) रघुनन्दनम्॥2॥

विट्ठलं(म्) मथुरास्थितं(म्) रजकान्तकं(ङ्) गजमारकं,
सन्नुतं(म्) बकमारकं(वँ) वृषघातकं(न्) तुरगार्दनम् ।
नन्दजं(वँ) वसुदेवजं(म्) बलियज्ञगं(म्) सुरपालकं(न्) ,
त्वां(म्) भजे जगदीश्वरं(न्) नररूपिणं(म्) रघुनन्दनम्॥3॥

केशवं(ङ्) कपिवेष्टितं(ङ्) कपिमारकं(म्) मृगमर्दिनम्,
सुन्दरं(न्) द्विजपालकं(न्) दितिजार्दनं(न्) दनुजार्दनम्।
बालकं(ङ्) खरमर्दिनं(म्) ऋषिपूजितं(म्) मुनिचिन्तितं(न्),
त्वां(म्) भजे जगदीश्वरं(न्) नररूपिणं(म्) रघुनन्दनम्॥4॥

शंकरं(ञ्) जलशायिनं(ङ्) कुशबालकं(म्) रथवाहनम्,
सरयूनतं(म्) प्रियपुष्पकं(म्) प्रियभूसुरं(लँ) लवबालकम् ।
श्रीधरं(म्) मधुसूदनं(म्) भरताग्रजं(ङ्) गरुड़ध्वजं(न्),
त्वां(म्) भजे जगदीश्वरं(न्) नररूपिणं(म्) रघुनन्दनम्॥5॥

गोप्रियं(ङ्) गुरुपुत्रदं(वँ) वदतां(वँ) वरं(ङ्) करुणानिधिम्,
भक्तपं(ञ्) जनतोषदं(म्) सुरपूजितं(म्) श्रुतिभिः (स्) स्तुतम् ।
भुक्तिदं(ञ्) जनमुक्तिदं(ञ्) जनरंजनं(न्) नृपनन्दनं(न्),
त्वां(म्) भजे जगदीश्वरं(न्) नररूपिणं(म्) रघुनन्दनम्॥6॥

चिद्घनं(ञ्) चिरजीविनं(म्) मणिमालिनं(वँ) वरदोन्मुखम् ,
श्रीधरं(न्) धृतिदायकं(म्) बलवर्धनं(ङ्) गतिदायकम् ।
शान्तिदं(ञ्) जनतारकं(म्) शरधारिणं(ङ्) गजगामिनं(न्),
त्वां(म्) भजे जगदीश्वरं(न्) नररूपिणं(म्) रघुनन्दनम्॥7॥

शार्ङ्गिणं(ङ्) कमलाननं(ङ्) कमलादृशं(म्) पदपंकजम्,
श्यामलं(म्) रविभासुरं(म्) शशिसौख्यदं(ङ्) करुणार्णवम्।
सत्पतिं(न्) नृपपालकं(न्) नृपवन्दितं(न्) नृपतिप्रियं(न्),
त्वां(म्) भजे जगदीश्वरं(न्) नररूपिणं(म्) रघुनन्दनम्॥8॥

निर्गुणं(म्) सगुणात्मकं(न्) नृपमण्डनं(म्) मतिवर्धनम्,
अच्युतं(म्) पुरुषोत्तमं(म्) परमेष्ठिनं(म्) स्मितभाषिणम् ।
ईश्वरं(म्) हनुमन्नुतं(ङ्) कमलाधिपं(ञ्) जनसाक्षिणं(न्),
त्वां(म्) भजे जगदीश्वरं(न्) नररूपिणं(म्) रघुनन्दनम्॥9॥

ईश्वरोदितमेतदुत्तममादराच्छतनामकं(यँ),
यः(फ्) पठेद् भुवि मानवस्तव भक्तिमांस्तपनोदये ।
त्वत्पदं(न्) निजबन्धुदारसुतैर्युतश्चिरमेत्य नो,
सोऽस्तु ते पदसेवने बहुतत्परो मम वाक्यतः ॥10॥

॥इति श्रीआनंदरामायणे पूर्णकाण्डे श्रीरामशतनामस्तोत्रं संपूर्णम्॥

